अवधेयम्

☛ यस्मिन् अङ्गे ग्रहणं, ताडनं, प्रहरणम् इत्यादिकं भवति, तस्य अङ्गस्य सप्तमीविभक्तिः भवति ।

3. उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु –

निपुणकुशालादीनां प्रयोगः

१. जगन्नाथः व्यवहारे कुशलः ।
२. सः .... अग्रेसरः ।
३. एषा .... समर्था ।
४. कुमारः .... शूरः ।
५. भवान् .... सरलः ।
६. सः .... पण्डितः ।
७. भवती .... चतुरा ।
८. शिक्षिका .... समर्था ।
९. सा .... निपुणा ।

व्यवहारः
क्रीडा
पाककार्यम्
रणम्
जीवनम्
सर्वविषयः
भाषणम्
श्लोकोच्चारणम्
चित्रकला

अवधेयम्

☛ यदा जनेषु निपुणता, कुशलता सामर्थ्यम् – इत्यादिकं प्रकटयामः, तदा यस्मिन् सः गुणः अस्ति तस्य सप्तमीविभक्तिः भवति ।

एतान् श्लोकान् उच्चैः पठन्तु –

कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती ।
करमूले सदा गौरी प्रभाते करदर्शनम् ।।

(लक्ष्मीः कराग्रे वसति । सरस्वती करमध्ये वसति । गौरी करमूले वसति । अतः प्रभाते करदर्शनं करणीयम् ।)

शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
सज्जना न हि सर्वत्र चन्दनं न वने वने ।।

(सर्वेषु पर्वतेषु माणिक्यं न भवति । सर्वेषु गजेषु मौक्तिकं न भवति । सज्जनाः सर्वत्र न भवन्ति । सर्वेषु वनेषु चन्दनवृक्षाः न भवन्ति ।)